# Shri shivAShTamUrtistotram

# श्रीशिवाष्टमूर्तिस्तोत्रम्

## Document Information

Text title : shivAShTamUrtistotram

File name : shivAShTamUrtistotram.itx

Category : shiva

Location : doc_shiva

Transliterated by : NA

Proofread by : Madhura Bal madhurabal11 gmail.com

Latest update : August 27, 2018

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

January 23, 2022

*sanskritdocuments.org*

# श्रीशिवाष्टमूर्तिस्तोत्रम्

ॐ तत्सदित्यमलधीभिरधीयमान-
मानन्दकन्दमवबोधमसद्विविक्तम् ।
यं ग्राहयन्ति निगमागमशासनानि
प्रत्यक्तया तमगजापतिमाश्रयामः ॥ १॥

ॐ भूर्भुवःस्वरिति तत्सवितुर्वरेण्यं
ध्यायेम मन्मथरिपोर्धिषणाः क्रियासु ।
यन्नः प्रचोदयति भर्ग ऋग्गादिभिस्त-
द्गीतस्य शम्भुशिवरुद्रमुखैः पदौघैः ॥ २॥

यस्मादिदं जगदशेषविशेषहीना-
ज्जातं भुजङ्गम इव प्रतिभाति रज्ज्वाम् ।
यस्मिन्विनश्यदखिलं न खिलं यमेति
हंसं नुमस्तममलं मुनिमानसानाम् ॥ ३॥

ब्रह्माच्युतादिमुकुटव्यतिषक्तपुष्प-
मालाविलासरसतुन्दिलितारुणश्रीः ।
भूयान्मृगाङ्ककलिकाललितावतंस-
पादाब्जरेणुरभिवाञ्छितसिद्धये नः ॥ ४॥

आमोदितो दितिजनाथशिरःप्रसूनै-
र्दैवेन्द्रमौलिसुमनोमकरन्दपीनः ।
बुद्ध्या युनक्तु शुभया भवतापहारी
मुग्धेन्दुमौलिचरणाम्बुजरेणुरस्मान् ॥ ५॥

आह्लादकत्वमपि चिन्तनतोऽधिगन्तुं
शीतांशुरग्निरखिलाशनदोषहानिम् ।
हार्दान्धकारपरिहारपटुत्वमर्को
यं सेवते नयनभावगतस्तमीडे ॥ ६॥

जूटेऽपगां शिरसि चन्द्रकलां कृशानुं
भानुं सुधांशुमधिदृष्ट्यधरे स्मितं च ।
कण्ठे विषं हृदि कृपाममृतं करे च
कृत्तिं कटौ मृगपतेरगराजपुत्रीम् ॥ ७॥

अङ्के शिरांस्यपि मनांसि पदाब्जयुग्मे
देवासुरेशयमिनां भसितं सितं च ।
भूषाविधौ च भुजगान्भवमादधानं
ज्योत्स्नाब्धिफेनघटितामिव मूर्तिमीडे ॥ ८॥

रङ्गःस्थलीश पुरुषार्थचतुष्टयस्य
रक्षास्पदं कृतलयस्खलितामराणाम् ।
पुष्णाति मातृवदशेषजनानसौ या
सर्वंसहा विजयते तव मूर्तिरेषा ॥ ९॥

आप्यायिनी तनुभृतां मलनाशिनी च
धात्रीव नाकफलकर्मनिदानमेकम् ।
येयं त्रिलोकसुखदा विविधात्मना सा
मूर्तिर्विभो विजयते तव जीवनाख्या ॥ १०॥

आधाय वेदविधिना शिव पञ्चधा यां
प्रीणन्ति दानवरिपून् कृतिनो वितानैः ।
कर्त्री लयस्य जगतामपि पालनस्य
सा ते तनुर्विजयते हुतभुक्स्वरूपा ॥ ११॥

यां जीवनौषधमिमां पवनाभिधानां
त्यक्त्वा न जीवितुमपि क्षणमेकमीष्टे ।
कोऽपीह गन्तुमपरत्र च लोकयात्रा-
नेत्री तनुर्विजयते तव सा महेश ॥ १२॥

आधारमीश गणनातिगताण्डकानां
सीम्नामभूमिरखिलान्तरबाह्यलीना ।
मीना इवान्तरुदकं भुवनानि यस्या-
माभान्ति सा विजयते तनुरम्बरं ते ॥ १३॥

उच्चावचासु तनुषु प्रविशन्सुखैको

नानाविधः स्फुरति यः पुरुषोऽविवेकात् ।
मुक्तोऽपि बद्ध इव भाति च सच्चिदात्मा
सा ते तनुर्विजयते जगदेकबन्धो ॥ १४॥

ह्लादं तनोति कुरुते तमसो विनाशं
तापं धुनोति विबुधानपि चौषधीर्या ।
पुष्णाति सा त्रिभुवनाभरणोज्ज्वलश्री-
रीशान ते विजयतेऽमृतभानुमूर्तिः ॥ १५॥

या स्तूयते श्रुतिभिरीश तनूरशेष-
लोकप्रवृत्तिजननी तिमिरं धुनाना ।
देवैः कृताञ्जलिपुटैर्मुनिभिश्च सा ते
नित्यं नुता विजयते तपनाभिधाना ॥ १६॥

अष्टाभिराभिरशरीर तनूभिरस्मां-
स्त्रायस्व लोकधिषणातिगतप्रभाव ।
बन्धुर्न कोऽपि भवदुःखशतार्दितानां
कारुण्यमङ्गलगृहाद्भवतः परोऽस्ति ॥ १७॥

आर्ता वयं भव भवप्रभवामयैस्त्वं
चार्तार्तिनाशनमखे खलु दीक्षितोऽतः ।
अर्थामहे निहतकाम निकाममेत-
द्वाधौघबाधनविधौ कुरु मावहेलाम् ॥ १८॥

संसारवाडवशिखापरिलीढगात्रा-
न्पात्रान्सुधारसभराकुलदृक्छटानाम् ।
त्वं चेदकारणकृपाकुलवासभूमि-
र्भूमञ्जहासि बत कं कृपणाः श्रयन्तु ॥ १९॥

संसारसागरभयङ्करगोधिकानां
चेञ्त्रायसे बत न मां कवलीभवन्तम् ।
ब्रूयान्न कः कृपणशोकविमोककारि-
न्कारुण्यमस्तमगमत्किल निर्निमित्तम् ॥ २०॥

शम्भो सुधाकरकलाकलितावतंस
स्थाणो सुधाशनसरिल्ललितावचूड ।
श्रीकण्ठ कातरमनाथमनाथबन्धो

त्रायस्व शोकदलितं करुणाम्बुधे माम् ॥ २१॥

स्वर्गापगाच्छुरितशीतमयूखभानु-
वर्धिष्णुगौररुचिरञ्जितरम्यमूर्तिः ।
भूयादनङ्गदमनो दमनो रिपूणां
नालिङ्गितार्थकरुणावरुणालयो नः ॥ २२॥

गङ्गाधरा शशिकलाललिता त्रिनेत्रा
नीला गले करतलेऽमृतकुम्भभर्त्री ।
कर्पूरपूरघटितेव पुनातु काचि-
त्सौभाग्यसम्पदतुला गिरिराजपुत्र्याः ॥ २३॥

क्षीराब्धिफेनशरदिन्दुसुधावदात
कृत्या भवाति न कदापि भवामयानाम् ।
यस्मात्कृपारसमवाप्य भुवः स विज्ञः
पीयूषपाणिरवताद्भिषजां वरेण्यः ॥ २४॥

येनाक्रियन्त भुवनानि विचित्रभोग-
योगाभिरामविषमाणि कपालयुग्मे ।
कीर्णानि नाकिनरनागमुखैः स नोऽव्या-
द्ब्रह्माण्डभाण्डघटनाचतुरः कुलालः ॥ २५॥

ससारदुर्जरपटं त्रिभिरेव तेने
चित्रं गुणैरपगताखिलतर्कचर्चाम् ।
बिभ्रच्चमत्कृतिकरीं रचनामसौ यः
पायान्मृगाङ्कमुकुटः प्रथमः कुविन्दः ॥ २६॥

आह्लादिनो विजयिनः शमिनोऽपि चार्ता-
न्क्रूरान्विधाय नटयन्नृसुरादिपात्रान् ।
यो मोदते स सुखयत्वनपेक्षकोऽस्मा-
न्ब्रह्माण्डनाटकमहामतिसूत्रधारः ॥ २७॥

पापं दृशा शासितकामकालया
तापं सुधासूतिमरीचिमालया ।
मोहान्धकारं निशितांशुजालया
नाशं नयोमेश्वर मे विशालया ॥ २८॥

जटास्खलद्देवनदीतरङ्गैऽ-
र्भालेन्दुरश्मिच्छुरितैः सदा नः ।
सुरासुराराधितपादपद्मः
श्रीशङ्करस्तापमपाकरोतु ॥ २९॥

स्तोत्रं महेशचरणप्रवणप्रबोधा-
नन्देन निर्मितमिदं यमिना नराणाम् ।
एणाङ्कखण्डशिखराङ्घ्रिसरोजचिन्ता-
सन्तानपूतमनसां तनुतां प्रमोदम् ॥ ३०॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यस्वामिप्रकाशानन्दपुरीविरचितं
शिवाष्टमूर्तिस्तोत्रं सम्पूर्णम् ॥

Proofread by Madhura Bal madhurabal11 gmail.com

*Shri shivAShTamUrtistotram*

pdf was typeset on January 23, 2022

Please send corrections to *sanskrit@cheerful.com*